
ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]

*A portal of Sarasvatniketanam*

## त्रिंशे-एकत्रिंशे च संयुक्ताङ्के भवतां सर्वेषां मङ्गलाभिनन्दनम्।




**www.sarasvatniketanam.org , www.jahnavisanskritejournal.in**



| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति-डा.सदानन्दझाः । |
| **पुनर्वीक्षकाः** | प्रो. पीयूषकान्त दीक्षित, डा. जयप्रकाशनारायणः, डा. अनिलप्रतापगिरिः । |
| **विशिष्टपुनर्वीक्षकाः** | Dr. PK Wendabona, Department of Basic Principles, Institute of Indigenous Medicine University of Colombo, Rajagiriya Sri Lanka |
| **सम्पादकाः** | डा. राधावल्लभशर्मा, डा. नरेश शर्मा डा. श्रीनाथधरद्विवेदी, श्रीश्यामवावू, डा. मुकेशकुमारः, डा. गजनमिश्रः, डा. बिपिनकुमारझाः । |
| **प्रकाशकः** | डा. विपिनकुमारझाः । |
| **प्रकाशन-सम्पादनसहायकाः** | डा. मीनाक्षीजोशी, श्रीरिपुदमनचन्द्र, सुश्रीगायत्रीशर्मा, डा. सुमनदीक्षित, डा. सरिताश्रीवास्तव, श्री सुमित-आनन्दः |
| **प्रतिनिधयः (लोकार्पणसन्दर्भे)** | श्री महेशदत्तः। |
| **तकनीकिप्रवन्धनसहायकः** | ग्तिज़ वेब होस्टिंग, बंगलोर। |



सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।

(233)



JAHNAVI-A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual (Sanskrit, Hindi & English) Journal.

## विषयानुक्रमणिका


| | | |
|---|---|---|
| I | प्रस्फुटम् | |
| 1 | सम्पादकीयम् | विद्यावाचस्पतिः डा. सदानन्दझा |
| 2 | प्रकाशकीयम् | डा. बिपिनकुमारझा |
| II.A | साहित्यानुरागः | |
| 1 | Different Types of Pramāṇa According to Sāṃkhya Philosophy | Asrulekha Tripathi |
| 2 | महाभाष्ये शब्दविमर्शः | *बृहस्पतिमिश्रः* |
| 3 | प्रतिभास्वरूपम् | रमेशचन्द्रनैलवाल |
| 4 | कणादरहस्य : एक पर्यालोचन | वालखेडे भूपेन्द्र अरुण |
| 5 | अद्वैत वेदान्त में भाषा-दर्शन | ममता स्नेही |
| 6 | गीतगणेशकाव्यस्य समीक्षणम् | कृपाशङ्करशर्मा |
| 7 | प्राचीन एवं अर्वाचीन दृष्टि से राजनीतिक विश्लेषण | दीपक साहू |
| 8 | धर्मस्य स्वरूपम् | राकेशपाठकः |
| 9 | आधुनिक संस्कृत काव्य और विदेशजवाद | अरुण कुमार निषाद |
| 10 | मध्यमकाव्यविमर्श | बिपिनकुमारझा |
| 11 | संस्कृत साहित्य में डा. रामकरण शर्माजी का का अवदान | सुमित कुमार मण्डन |
| 12 | सन्निपातपरिभाषाप्रयोजनम् | गिरिधारीपण्डा |
| 13 | प्रसन्नराघव में वन्य जीव संरक्षण | उष्मा यादव |
| 14 | यज्ञ : पर्यावरण विज्ञान | नन्दिनी दास |
| 15 | कालीदासीय साहित्य में कविसमय विषयक विवेचन | गीता शुक्ला |
| 16 | संस्कृतभाषाशिक्षणे ई-अधिगमः नवाचारश्च | कुमुदानन्दझा |
| 17 | याज्ञवल्क्यस्मृति में वर्णित आश्रम व्यवस्था: | माधुरी |
| 18 | प्राचीन संस्कृत ग्रन्थ एवं हरियाणा क्षेत्र- | महेश दत्त |
| 19 | उरुभंग में करुण-रस और उसका मनोवैज्ञानिक विश्लेषण | निधि कान्त ठाकुर |
| 20 | Advent of Hayagrīva in the Purāṇic Literature | *Anindita Adhikari* |
| 21 | मनोविश्लेषणात्मक दृष्टि से बालचरित नाटक में अद्भुत-रस | संगीता कुमारी |
| 22 | ऋग्वेदसंहितायां प्राणतत्त्वम् : शास्त्रीयं समीक्षणम् | प्रतापचन्द्र रायः |
| 23 | A Study on Śakti: Philosophical analysis of Śakti in Kashmir Śaivism- | Sukanya Boruah, Prabhat Kumar Rai. |
| 24 | वाक्यपदीय के अनसार ब्रह्मस्वरूप | मीनाक्षी |

[A First International Electronic Peer-reviewed Quarterly Refereed UGC Approved (41039 ) Sanskrit Tri-lingual Journal] Available at- www.jahnavisanskritejournal.in Issue-30th-31st, Year 07, Vol -III, Date-13/11/2017 ISSN 0976-8645

# महाभाष्ये शब्दविमर्शः

*बृहस्पतिमिश्रः*[15]

---

**मुख्यशब्दः** – शब्दः, मनीषा, लौकिकः, ध्वनिः ।

---

**सारांशः**

अथ गौरित्यत्र कः शब्दः[16] इति ब्रुवता किमपि विशिष्टविवक्षया सहस्रशिरस्कः शेषनाग[17] इव सहस्रबुद्धि-युक्तः अत एव सहस्रयुक्तियुक्तो महाभाष्यकारो भगवान् पतञ्जलिः किं प्रतिपादयति इति जिज्ञासायां शब्दः इत्यत्र कः शब्दः? इति अन्वेषणीयं भवति । महाभाष्यस्य प्रारम्भः आचार्यपाणिनेः अथ शब्दानुशासनम्[18] इत्यस्य प्रथमस्य माङ्गलिकसूत्रस्य[19] व्याख्यया आरम्भो भवति तत्र - "अथेत्ययं शब्दोऽधिकरार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रम् अधिकृतं वेदितव्यम्"[20] इत्युक्त्वा प्रथमस्य अस्य शास्त्रस्य मूल-बिन्दोः शब्दस्य तत्त्वं ज्ञापयितुम् इच्छति ।

ऋषीणां मनीषा यत् तत्त्वम् पश्यति सामान्यस्य मनीषा तत् तत्त्वं तत्त्वमिव न चिन्तयति । अत एव "केषां शब्दानाम्" इति प्रश्नं कृत्वा "लौकिकानां वैदिकानां च ,लौकिकास्तावत् गौरश्वः पुरुषो---- इति । वैदिका खल्वपि" इत्युक्त्वा शं नो देवीरभिष्टये[21].., इषे त्वोर्जे त्वा[22]..., अग्निमीळे पुरोहितं[23]...., अग्न याहि वीतये[24]....."[25] इत्यादीनां चतुर्णां वेदानां प्रथमस्य प्रथमस्य मन्त्रस्य-आरम्भशब्दान् उल्लिखति । तदनन्तरम् उदाहृतेषु लौकिक-शब्देषु ये च वेदेषु अपि सुलभाः तेभ्यः प्रथमम् एव शब्दं गौः इति गृहीत्वा अतीव तात्त्विकं प्रश्नम् उत्थापयति। सामान्यतः संकेतितशब्दस्य शक्तिग्रहो व्याकरणोपमानात् कोषाप्तवाक्यात् व्यहारतश्च[26] इति पञ्चभिः प्रकारैः भवति इत्यत्र नासत्येव सन्देहः। पुनरपि शेषावतारो भगवान् पतञ्जलिः पृच्छति चेत् रहस्यं तु स्यादेव । अत एव सुहृद् भूत्वा एष आचार्यः पुनः विकल्पान् चर्चयति पुनश्च एकैकं खण्डयति । शक्तिग्रहे गौरित्यत्र शब्दे कदाचित्

---

[15] प्राध्यापकः, श्रीशक्ति-संस्कृत-महाविद्यालयः, श्रीनयनादेवी जी, बिलासपुर, हि० प्र०

[16] पश्पशाह्निकम् ,महाभाष्यम् , युधिष्ठिरमीमांसककृता हिन्दीव्याख्या , पृष्ठ-संख्या - 4

[17] पतञ्जलिचरितम् 1.63 ,लेखकः श्रीरामभद्रदीक्षितः(महाभाष्य और ध्वनि विचार पुस्तक में पृष्ठ10 पर उद्धृत,(डॉ.भूषण कुमार उपाध्याय, द्विवेदी लॉ हाउस,इलाहाबाद)

[18] पाणिनीयाष्टाध्यायी –प्रत्याहारसूत्राणाम् आरम्भे

[19] युधिष्ठिरमीमांसककृतम् संस्कृतव्याकरण शास्त्र का इतिहास , भाग 1 , पृष्ठसंख्या 210,211 ,तृतीय संस्करणम्

[20] पश्पशाह्निकम् ,महाभाष्यम् , युधिष्ठिरमीमांसककृता हिन्दीव्याख्या , पृष्ठ-संख्या - 1

[21] अथर्ववेदसंहिता (पैप्पलादसंहिता)- 1/1/1 (पश्पशाह्निकम् ,महाभाष्यम् , युधिष्ठिरमीमांसककृता हिन्दीव्याख्या , पृष्ठ-संख्या – 4 पर उद्धृत)

[22] यजुर्वेदसंहिता - 1/1/1

[23] ऋग्वेदसंहिता - 1/1/1

[24] सामवेदसंहिता - 1/1/1

[25] पश्पशाह्निकम् ,महाभाष्यम् , युधिष्ठिरमीमांसककृता हिन्दीव्याख्या , पृष्ठ-संख्या - 3

[26] संस्कृत-व्याकरण-दर्शन ,श्रीभीमसिंह वेदालंकार , पृष्ठ-संख्या -225